# संस्कृतवार्ताः

दिनाङ्क :- 14.09.2026 सायम् - 06:20

मुख्यवार्ताः

- ब्रिक्स-देशानां नेतारः सामाजिक-आर्थिक-विकासस्य, राष्ट्रिय-सुरक्षायाः, सर्वेषां राष्ट्राणां कल्याणस्य च कृते ऊर्जासुरक्षा महत्त्वपूर्णा आधारशिला इति प्रतिपादितवन्तः। प्रोक्तं च यत् प्रौद्योगिक्याः महत्त्वपूर्ण-खनिनां शस्त्रीकरणं प्रगतौ बाधकं भवितुम् अर्हति।

- प्रशासनेन उक्तम् यत् सेनायाः अथकप्रयत्नैः पञ्चविंशत्युत्तर-द्विसहस्र-तमे वर्षे उत्तर-सीमासु चीनदेशस्य सैनिकानाम् नियोजने उल्लेखनीया न्यूनता दृश्यते । जम्मू-कश्मीरस्य सुरक्षास्थितिः अपि पूर्णतया नियन्त्रणे वर्तते।

- केन्द्रीय-गृहमन्त्री अमित-शाहः अवोचत् यत् भारतस्य भाषावैविध्यं देशे विविधतायाम् एकतायाः भवनां द्रढयति। हिन्दी दिवसावसरे एकस्मिन् दृश्याङ्कन-सन्देशे गृहमन्त्री देशवासिभ्यः शुभकामनाः अयच्छत्।

- कृत्स्ने हि देशे अद्य गणेश-चतुर्थीपर्व महता भक्ति-भावेन श्रद्धया च आचर्यते। अयं पावनदिवसः ऋद्धि-बुद्धि-सिद्धीनां प्रतीक-भूतस्य भगवतः श्रीगणेशस्य जन्मोत्सवत्वेन आमान्यते।

- जर्मनी देशस्य अलेक्जेण्डर-ज्वेरेवः यू.एस. मुक्त टेनिस-क्रीडायाः पुरुष एकल-वर्गस्य स्पर्धा विजितवान्

अथ वार्ताः विस्तरेण

ब्रिक्स-सम्मेलनम्

ब्रिक्स-देशानां नेतारः सामाजिक-आर्थिक-विकासस्य, राष्ट्रिय-सुरक्षायाः, सर्वेषां राष्ट्राणां कल्याणस्य च कृते ऊर्जासुरक्षा महत्त्वपूर्णा आधारशिला इति प्रतिपादितवन्तः। नवदिल्लीनगरे आयोजिते द्विदिवसीये ब्रिक्स-शिखर-सम्मेलने सदस्यराष्ट्रैः ऊर्जाविपणौ स्थिरतां वर्धयितुं, विविध-स्रोतसां माध्यमेन ऊर्जसः निर्बाध-प्रवाहं सुनेश्चितुं, महत्त्वपूर्ण-ऊर्जा-अवसंरचनायाः संरक्षणं च कर्तुं आवश्यकता प्रतिपादिता। शिखर-सम्मेलने प्रधानमन्त्री नरेन्द्रमोदी समाह्वानं दत्तवान् यत् प्रौद्योगिक्याः महत्त्वपूर्ण-खनिनां शस्त्रीकरणं प्रगतौ बाधकं भवितुम् अर्हति। ब्रिक्स-शिखर-सम्मेलनस्य सर्वाधिकं महत्त्वपूर्णं परिणामं नवदिल्लीनिर्णयस्य स्वीकृतिः आसीत्। अत्र प्रमुखेषु भू-राजनैतिकेषु आर्थिकेषु च विषयेषु सहयोगस्य दृष्टिकोणः प्रतिपादितः। पश्चिम-एशियायाः परिस्थितिं दृष्ट्वा ब्रिक्स-नेतारः अधिकतम-संयमस्य, संवादस्य कूटनीतेः च आह्वानं कृतवन्तः। ब्रिक्स-नेतारः नागरिकानां नागरिक-अवसंरचनायाः च रक्षणस्य आवश्यकतां बलपूर्वकं प्रतिपादितवन्तः। नेतृभिः सर्वेषु रूपेषु आतङ्कवादस्य निन्दा कृता आतंकवादस्य प्रति शून्य-सहिष्णुतायाः नीतिश्च पुनः दृढीकृता। संक्रामक-रोगाणां निवारणाय प्रतिक्रियायै च 'ब्रिक्स-एकीकृत-प्रारम्भिक-समाह्वान-व्यवस्था' विषये अपि सहमतिः प्राप्ता।

रक्षा उत्तरदिशि

प्रशासनेन उक्तम् यत् सेनायाः अथकप्रयत्नैः जम्मू-कश्मीरस्य सुरक्षास्थितिः पूर्णतया नियन्त्रणे वर्तते। गत-वर्षस्य नवीनतम-वार्षिक-प्रतिवेदने रक्षामन्त्रालयेन अवलोकितं यत् एतेषां प्रयत्नानाम् परिणामेण हिंसायां महती न्यूनता जाता । विरोध-प्रकरणानि अपि न्यूनतां गतानि, सममेव प्रस्तर-प्रहार-घटनाः अपि नाभवन् । चीनदेशेन सम्बद्धा समग्रस्थितिः अपि प्रतिवेदने प्रकाशिता अस्ति। पञ्चविंशत्युत्तर-द्विसहस्र-तमे वर्षे उत्तर-सीमासु चीनदेशस्य सैनिकानाम् नियोजने उल्लेखनीया न्यूनता दृश्यते । वास्तविक-नियन्त्रण-रेखायां पारम्परिक-प्रशिक्षण-क्षेत्रेषु च समकक्षं बलं नियोजितम्। भारतस्य चीनस्य च मध्ये राजनैतिक-कूटनीतिक-सैन्य-स्तरयोः द्विपक्षीयसङ्गतिः उत्तरसीमासु सकारात्मकविकासान् जनयति, येन परिणामेण अधिका स्थिरता अभवत्।

गणेशचतुर्थी

कृत्स्ने हि देशे अद्य गणेश-चतुर्थीपर्व महता भक्ति-भावेन श्रद्धया च आचर्यते। अयं पावनदिवसः ऋद्धि-बुद्धि-सिद्धीनां प्रतीक-भूतस्य भगवतः श्रीगणेशस्य जन्मोत्सवत्वेन आमान्यते। विनायक-चतुर्थी उत गणेशोत्सवः इति नाम्ना प्रसिद्धः अयं दिनविशेषः दश-दिवसीयानाम् उत्सव-कार्यक्रमाणां शुभारम्भं सूचयति, यस्मिन् भक्ताः स्वकीय-गृहेषु मण्डपेषु च भगवतः गणेशस्य मृण्मयीं प्रतिमानं प्रतिष्ठाप्य विधिवत् पूजार्चनं कुर्वन्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना देशवासिभ्यः गणेशचतुर्थी पर्वणः शुभकामनाः प्रदत्ताः।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

प्रधानमन्त्री सेमिकॉन् इण्डिया

प्रधानमन्त्री नरेन्द्रमोदी बुधवासरे नवदिल्ल्यां यशोभूमिस्थले ऐषमः सेमीकॉन इण्डिया इत्यस्य पञ्चम-संस्करणम् उद्घाटयिष्यति। अस्मिन् कार्यक्रमे षडशताधिकाः प्रदर्शकाः, त्रिशतम् अन्ताराष्ट्रियसमवायाः, चत्वारिंशदधिकेभ्यः देशेभ्यः प्रतिभागिनः च भागं गृह्णन्ति । अस्यां प्रदर्शिन्यां षड् राष्ट्राणां द्वाविंशतिः राज्यप्रशासनानां मण्डपान् समेत्य स्टार्ट् अप् इत्येतेषां च मण्डपाः अन्तर्निहिताः सन्ति।

शाह-हिन्दीदिवसः

केन्द्रीय-गृहमन्त्री अमित-शाहः अवोचत् यत् भारतस्य भाषावैविध्यं देशे विविधतायाम् एकतायाः भवनां द्रढयति। हिन्दी दिवसावसरे एकस्मिन् दृश्याङ्कन-सन्देशे गृहमन्त्री देशवासिभ्यः शुभकामनाः अयच्छत्। तेन उक्तं यत् भारतं भाषिकवैविध्ययुतं सांस्कृतिकसमृद्धिपरं च राष्ट्रं विद्यते। गृहमन्त्री अवोचत् यत् नैकाः भाषाः भारतस्य शक्तयः सन्ति न तु दुर्बवता। तेन प्रोक्तं यत् हिन्दी भाषायः उन्नतिः तदैव वर्तते यदा सा अन्यासां भारतीय-भाषाणां सम्मानं प्रचार-प्रसारं संरक्षणं च कुर्यात्।

हिन्दी-दिवसः अद्य आदेशम् आयोज्यते। गतशताब्दस्य ऊनपञ्चाशत् तमे वर्षे संविधानसभया देवनागर्यां निबद्धा हिन्दी भारतस्य राजभाषा रूपेण स्वीकृता।

प्रशासनम् कृष्णाङ्गारः

सर्वकारेण उक्तं यत् विंशत्युत्तर-द्विसहस्र-तमवर्षाम् आरभ्य नवसु राज्येषु सप्तचत्वारिंशदुत्तरैकशतं अङ्गारखण्डानां सघोषविक्रयः कृतः। कृष्णाङ्गार-मन्त्रालयेन उक्तं यत् अनेन प्रतिवर्षम् अनुमानतः सार्धसप्तचत्वारिंशत्-सहस्र-कोटिरूप्यकाणाम् आयः अथ चतुर्दशांशोत्तर-नव-लक्षं वृत्तयः जनयिष्यन्ते।

मन्त्रालयेन उक्तं यत् गते वित्तीयवर्षे आवण्टित-वाणिज्यिक-खनिभ्यः प्राप्तः सकलायः प्रायः त्रिसहस्रं नवति कोटिरूप्यकाणि आसीत्।

भारत-ओमान-पोतः:

भारतेन ह्यः ओमानतटे 'एमटी ई एल गया' (MT EL Gaia) इति वाणिज्यिक-पोते जातस्य आक्रमणस्य निन्दा कृता। एकस्यां विज्ञप्तौ ओमान-देशे स्थितेन भारतीय-दूतावासेन उक्तं यत् अद्यावधि त्रयोदश भारतीय-दलसदस्याः सुरक्षिताः उद्धृताः, यद्यपि एकस्य विलुप्तस्य भारतीयनागरिकस्य अन्वेषणम् उद्धारकार्यं च निरन्तरं विधीयते। दूतावासेन उक्तं यत् स्थितिः सूक्ष्मतया निरीक्ष्यते, अन्वेषण-उद्धारकार्ये ओमान-अधिकारीभिः सह समन्वयम् विधीयते। भारतीय-दूतावासेन भारतीयनागरिकान् उद्धर्तुं लब्धस्य सहयोगस्य कृते ओमान-प्राधिकारिभ्यः धन्यवादः अपि ज्ञापितः।

टेनिस्

जर्मनी देशस्य अलेक्जेण्डर-ज्वेरेवः यू.एस. मुक्त टेनिस-क्रीडायाः पुरुष एकल-वर्गस्य स्पर्धा विजितवान् सः गतरात्रौ न्यूयार्क-नगरे अमरीकायाः बेन-शेल्टनं इत्येनं षट्-त्रि, सप्त-षट्, सप्त-द्वौ इति अङ्कैः पराजितवान्। विजयोऽयं षट्विंशत्यदिक-द्विसहस्रतमवर्षे अलेक्जेण्डर-ज्वेरेवस्य द्वितीयः प्रमुख-विजयः वर्तते।

।। इति वार्ताः ।।